दिनाङ्कः-------------------

**डी.ए.वी. पब्लिक-विद्यालया; दिल्ली-एन.सी.आर.**

**संस्कृतम्**

**आदर्शप्रश्नपत्रम् (2026-27)**

**अर्धवार्षिकी परीक्षा**

**कक्षा- अष्टमी**

**अवधिः– होरात्रयम्** **पूर्णाङ्कः– 80**

**निर्देशाः**

**1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति ।**

**2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 20 प्रश्नाःसन्ति ।**

- **अस्मिन् प्रश्नपत्रे चत्वारःखण्डाःसन्ति ।**
- **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।**
- **प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।**
- **प्रश्नपत्रे उत्तराणि न लेखनीयानि।**

## खण्डः– 'क'

**अपठित-अवबोधनम्** **10 अङ्काः**

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

पुरा शुद्धोधनः नाम एकः नृपः आसीत्। तस्य पुत्रः सिद्धार्थः आसीत्। सिद्धार्थः एकदा भ्रमणाय वनम् अगच्छत्। सःप्रकृतेःमनोहरं रुपं दृष्ट्वा अतिहर्षितःअभवत्। परं सःसहसा एकं क्रन्दनध्वनिम् अश्र्णोत् । सःइतस्ततःअपश्यत्। तदा सःअपश्यत् यत् बाणेन विद्धःएकःहंसःभूमौ पतितःआसीत्। तस्य दयनीयां दशां दृष्ट्वां सः करुणया व्याकुलः जातः। सः अचिरात् हंसस्य समीपम् अगच्छत् तस्य शरीरात् बाणं निष्कास्य उपचारं च अकरोत् । अत्रान्तरे देवदत्तःइति नाम एकःयुवकःतत्र आगत्य तं हंसम् अयाचत। सः अवदत् – अयं मम हंसः अस्ति। परन्तु सिद्धार्थः तं हंसं देवदत्ताय न अयच्छत्। तदा तौ विवादस्य शमनार्थं राजसभाम् अगच्छताम्। नृपःसर्वं वृतान्तं श्रुत्वा आदिशत्- भक्षकात् रक्षकःश्रेयान् । अतःअस्य हंसस्य स्वामी सिद्धार्थःएव अस्ति।

**(अ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** **1×2=2**

(i) नृपस्य नाम किम् आसीत् ?

(ii) सिद्धार्थःभ्रमणाय कुत्र अगच्छत् ?

(iii) भक्षकात् कःश्रेयान् ?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) सिद्धार्थःकिमर्थम् अतिहर्षितःअभवत् ?

(ii) कःबाणेन विद्धःआसीत् ?

(iii) तौ किमर्थं राजसभाम् अगच्छताम् ?

**(इ) अस्य गद्यांशस्य उचितं शीर्षकं लिखत-** **1**

**(ई) निर्देशानुसारं उत्तरत** **1×3=3**

(i) 'दशाम्' इति पदस्य विशेषणपदं किम् ?

(क) दयनीयाम् (ख) सुन्दरम्

(ग) मनोहरम् (घ) सर्वम्

(ii) 'राजा' इत्यस्य पदस्य कःपर्यायःगद्यांशे प्रयुक्तः?

(क) नृपः (ख) हंसः

(ग) युवकः (घ) देवदत्तः

(iii) सिद्धार्थःतं हंसं देवदत्ताय न अयच्छत् ? अस्मिन् वाक्ये कर्तृपदं किम् ?

(क) सिद्धार्थः (ख) हंसं

(ग) देवदत्ताय (घ) अयच्छत्

## खण्डः– 'ख'

**(रचनात्मक-कार्यम्)** **15 अङ्काः**

**2. मञ्जूषायां प्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा पूर्णं पत्रं लिखत -** **½×10 = 5**

परीक्षाभवनात्

तिथि: ___________

प्रियमित्र हंसराज !

सप्रेमं नमो नमः

अत्र कुशलं (i) ___________। भवतः पत्रं प्राप्तम्। पत्रं पठित्वा अहम् अतीव प्रसन्नः (ii) ___________ यत् भवतः विद्यालये भवान् नाटक-प्रतियोगितायां भागं गृहीतवान्। अद्य अहं मम विद्यालयस्य योगदिवस-समारोहस्य विषये वर्णनं कर्तुम् इच्छामि। प्रतिवर्षम् इव अस्मिन् वर्षे अपि मम (iii) ___________ योगदिवस-समारोहः आयोजितः। अस्मिन् अवसरे छात्रा; तेषाम् अभिभावकाः शिक्षकाः च उपस्थिताः आसन्। अस्माकं विद्यालयस्य अध्यक्षः अस्य (iv) _________ विशिष्टातिथिः आसीत्। सर्वप्रथमं अस्माकं प्रधानाचार्या महोदया अध्यक्ष-महोदयानां पुष्पगुच्छैः (v) __________अकरोत्। स्वागतस्य अनन्तरं सर्वे छात्राः योगासनानां प्रदर्शनम् अकुर्वन्। छात्राणाम् उत्तमानि विविधानि योगासनानि (vi) __________ सर्वे चकिताः अभवन्। सर्वे करतलध्वनिना तेषाम् उत्साहवर्धनम् अकुर्वन्। (vii) __________ अपि तस्मिन् समूहे योगासनं कृतवान्। तत्पश्चात् सर्वे मिलित्वा योगाभ्यासम् अकुर्वन्। अन्ते विशिष्टातिथिः महोदयः योगस्य (viii) _______वर्णितवान्। विस्तरेण पुनःलेखिष्यामि। (ix) _________प्रणामाःनिवेदनीयाः।


(x) ________________ अभिन्नं मित्रम्

दिव्यः

**मञ्जूषा**

| |
|---|
| दृष्ट्वा, महत्त्वम्, विद्यालये, समारोहस्य, भवत; अहम्, पितृभ्याम्, स्वागतम्, अभवम्, तत्रास्तु। |

**3.अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत-**
**1×5 = 5**



**मञ्जूषा**

| |
|---|
| एकः, स्वच्छम्, ग्रामः, गृहाणि, वृक्षाः, जलम् , महिला, जनाः,नलकूपः, घटः, वाहनचक्राणि, कुर्वन्ति, कार्यम्। |

**अथवा**

**'वृक्षारोपणम्'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतभाषया पञ्च वाक्यानि लिखत।

**मञ्जूषा**

| |
|---|
| वृक्षाः , जना; पक्षिण; वातावरणम्, शुद्धम्, सुन्दरम्, पुष्पाणि, विशालाः , वृक्षारोपणम्, प्राणवायुम्। |

**4. अधोलिखितां कथां मञ्जूषायाःसहायतया पूरयित्वा पुनःलिखत - ½×10 = 5**

एकः काकः आसीत्। सः मुखे (i) ________________ गृहीत्वा वृक्षे उपविष्टः आसीत्। तत्र एकः (ii) ________________ भ्रमति स्म। सः अतीव (iii) ________________ आसीत्। सः तं काकं (iv) ___________ अचिन्तयत् – “कथम् अहम् अस्य काकस्य रोटिकां प्राप्तुं शक्नोमि?” किञ्चित् विचार्य सः श्रृगालः काकम् अवदत् - (v) ______________________! खगेषु भवान् एव सुन्दर; चतुरः, मधुरगायकः च। यदा भवान् गीतं गायति तदा वने सर्वे पशवः पक्षिणः च प्रसन्नाः भवन्ति। कृपया एकं (vi) __________ गायतु। काकः स्वप्रशंसां श्रुत्वा अतीव (vii) ________________ अभवत्। यदा सः गीतं गातुम् उद्यतः अभवत् (viii) ______________________ तस्य मुखात् रोटिकाखण्डं (ix) ______________ अपतत्। श्रृगालःरोटिकां नीत्वा पलायितः। अन्ते काकः (x) ___________ अकरोत् ।

**मञ्जूषा**

| |
|---|
| चतुर; गीतम्, नीचैः; तदा, दृष्ट्वा, प्रसन्न; श्रृगाल; भो मित्र, रोटिकाखण्डम्, पश्चात्तापम् । |

**अथवा**

**4. रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनःलिखत- 1×5=5**

**प्रिया** - नमस्ते सखि ! (i)________________ ?

**संजना-** नमस्ते! अहं कुशली अस्मि ।

**प्रिया-**(ii) ________________________ ?

**संजना-** सत्यं । वसन्ते कः प्रसन्नः न भवति ?

**प्रिया-** सत्यं ! अयम् ऋतुःआनन्ददायकःभवति ।

**संजना** - सखि । एतदर्थम् (iii)__________________

**प्रिया** - शोभनम् । अस्मिन् ऋतौ सुरभितःवायुः वहति । तडागेषु कमलानि विकसन्ति। पुष्पेषु भ्रमराः गुञ्जन्ति ।

**संजना** - आम् सखि!(iv)________________________

**प्रिया** - अस्मिन् ऋतौ सर्वत्र सुन्दरं वातावरणं भवति ।

**संजना** - अत एव -(v)____________________

**मञ्जूषा-**

(i) अयम् ऋतुः मह्यम् अतीव रोचते ।

(ii) अयं ऋतुराजःकथ्यते।

(iii) आम्रवृक्षेषु कोकिलाः अपि कूजन्ति ।

(iv) त्वं कथम् असि ?

(v) अद्य भवती अतिप्रसन्ना प्रतीयते।

**खण्डः - 'ग'**

**(अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः**

**5. अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं च प्रदत्त-विकल्पेभ्यःचित्वा लिखत - 1×2=2**

**(i) व्+इ+द्+य्+आ+व्+आ+न्**

(क) विद्यावन् (ख) विद्यावान

(ग) विध्यावान् (घ) विद्यावान्

**(ii) अनेकानि**

(क) अ+न+ए+क+आ+न+इ

(ख) अ+न्+ए+क्+आ+न्+इ

(ग) अ+न्+अ+क्+आ+न्+इ

(घ) अ+न्+ए+क्+आ+न्+ई

**6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा पूर्णवाक्यं लिखत - 1×3 = 3**

**(अ)** (i) **दयानन्दः**अतीव क्षमाशीलःआसीत्।

(ii) छात्रैःएका **प्रश्न + उत्तरी** आयोजिता आसीत्।

(iii) अहं तव **प्रति + ईक्षायाम्** आसम् ।

**अथवा**

**(आ)** (i) श्यामपट्टे एका **सु+उक्तिः**लिखिता अस्ति ।

(ii) **महर्षिः**भारते सर्वत्र अभ्रमत्।

(iii) जनाः**यन्त्र+आलयानां** पदार्थान् नद्याःजले क्षिपन्ति।

**7. अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा वाक्यानि पूरयत। 1×3 = 3**

**(i) बालः___________ खादति।**

(क) फलैः (ख) फलस्य

(ग) फलात् (घ) फलम्

**(ii) भवान् _____________ विद्यालये पठति ?**

(क) कौ (ख) कस्मिन्

(ग) कस्मात् (घ) कस्य

**(iii) _______________ जलं शीतलम् अस्ति |**

(क) नदीम् (ख) हे नदि!

(ग) नद्याः (घ) नद्यः

**8. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यःचित्वा लिखत- 1×3=3**

**(i) उद्याने ___________ जनाःसूर्यं नमन्ति। (22)**

(क) विंशतिः (ख) एकविंशतिः

(ग) पञ्चविंशतिः (घ) द्वाविंशतिः

**(iv) मम पुस्तकालये संस्कृतस्य (11)______________ पुस्तकानि सन्ति |**

(क) एकः (ख) एकादश

(ग) एकोनविंशति: (घ) एकम्

**(iii) तत्र ___________ श्रृगालःभ्रमति। (1)**

(क) एका (ख) एकम्

(ग) एकस्य (घ) एकः

**9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत** 1×4 = 4

(i) भक्ताः**मन्दिरं** प्रति गच्छन्ति।

(ii) पिता **पुत्राय** फलं यच्छति।

(iii) छात्रा **गुरुणा** सह गच्छति ।

(iv) श्री **भगवते** नमः।

**10. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यःसमुचितं धातुरूपं चित्वा वाक्यानि पूरयत -** 1×3 = 3

(i) **काकः लज्जितः________________ ।**

(क) भवन्ति (ख) भवतः

(ग) भवति (घ) भवामि

**(ii) शिष्यः गुरुं___________________ ।**

(क) सेवते (ख) सेवेते

(ग) सेवन्ते (घ) सेवध्वे

**(iii) महर्षिः दयानन्दःअतीव क्षमाशीलः______________ ।**

(क) आस्व (ख) आस्ताम्

(ग) आसन् (घ) आसीत्

**11. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत -** 1×3 = 3

(i) मूषकाःश्रृगालं **दृश् + क्त्वा** चकिताःभवन्ति ।

(ii) बालः **खेलितुम्** इच्छति।

(iii) शिक्षकःपुस्तकम् **आ + दा + ल्यप्** कक्षां प्रति गच्छति।

**12. (अ)मञ्जूषातःउचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णवाक्यं च लिखत** 1×2 = 2

(i) लौकिकसंस्कृतस्य आरम्भः________________अभवत् ?

(ii) श्रृगालःभोजनं प्राप्तुम् ___________________ भ्रमति स्म।

**मञ्जूषा**

| |
|---|
| इतस्ततः; अपि, कदा |

**अथवा**

**(आ) मञ्जूषातःउचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत <u>पूर्णं वाक्यं</u> च लिखत -**

(i) अहं भोजनेन ______________ जनान् पालयामि।

(ii) गच्छ गच्छ। _________ स्थानं नास्ति।

**मञ्जूषा**

| अत्र, कदा, अपि। |
|---|

**13. (अ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत -1×2 = 2**

(i) मानवजीवनाय **<u>उपयोगिनः</u>**ग्रन्थाःअपि संस्कृते सन्ति ।

(ii) शिष्यस्य भावम् **<u>अव+गम्य</u>** महर्षिःअकथयत्।

**अथवा**

**(आ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत -**

(i) यात्री **<u>दुर्वचनानि</u>** अकथयत्।

(ii) खगाःआकाशे **<u>उत् +पतन्ति</u>**।

**खण्डः– 'घ'**

**(पठित-अवबोधनम्)** 30 अङ्काः

**14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** 5

महर्षिःदयानन्दःअतीव क्षमाशीलःआसीत्। एकदा सःकाशीनगरे गङ्गायाःतटे एकस्मिन् कुटीरे शिष्यैः सह अतिष्ठत्। तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्। ईर्ष्यया सः यात्री महर्षेः कुटीरम् आगत्य अकारणम् एव महर्षिं दुर्वचनानि वदति स्म। जितेन्द्रियःमहर्षिःसर्वं श्रुत्वा शान्तचित्तेन एव तिष्ठति स्म। सः कदापि न प्रत्युदतरत्। शिष्याः क्रुद्धाः अभवन्। महर्षिः तान् 'चिन्तां मा कुरुत, तूष्णीं भवत' इति अकथयत्। महर्षिः कथयति स्म यत् सःस्वयम् एव एकस्मिन् दिने सरलः भविष्यति। एकदा एकः जनः प्रचुराणि फलानि तत्र आनयत्। महर्षिःदयानन्दःकानिचित् मधुराणि रसयुक्तानि फलानि वस्त्रे बद्धा तस्मै यात्रिणे दातुं स्वशिष्यं प्रेषितवान्।

**(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** ½×2 = 1

(i) महर्षिःदयानन्दःकीदृशः आसीत् ?

(ii) महर्षिःकस्याःतटे शिष्यैःसह वसति स्म ?

(iii) के क्रुद्धाः अभवन् ?

**(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** 1×2 = 2

(i) यात्री महर्षेःकुटीरम् आगत्य किं करोति स्म ?

(ii) महर्षिःदयानन्दःयात्रिणे किं प्रेषितवान् ?

(iii) महर्षिं दुर्वचनानि श्रुत्वा किं करोति स्म ?

**(इ) निर्देशानुसारम् उत्तरत-** 1×2 = 2

(i)'जनः प्रचुराणि फलानि आनयत्' अत्र विशेष्यपदम् किम् अस्ति ?

(क) प्रचुराणि (ख) फलानि

(ग) जनः (घ) आनयत्

(ii)'तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्।' अस्मिन् वाक्ये क्रियापदं किम् अस्ति?

(क) तत्र (ख) अपि

(ग) अतिष्ठत् (घ) एव

**15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5**

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापम् अपाकरोति।**
**चेतःप्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गतिःकथय किं न करोति पुंसाम् ॥**

**(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) ½×2 = 1**

(i) सत्सङ्गतिःकस्याःजाड्यं हरति ?

(ii) का पापम् अपाकरोति ?

(iii) सत्सङ्गतिःकिं प्रसादयति ?

**(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) 1×2 = 2**

(i) सत्सङ्गतिःकेषां कृते सर्वं करोति?

(ii) सत्सङ्गतिःसत्यं कुत्र सिञ्चति?

(iii) सत्सङ्गतिःकीर्तिं कुत्र तनोति?

**(इ) निर्देशानुसारम् उत्तरत- 1×2 = 2**

(i) 'मूर्खताम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(क) चेतः (ख) जाड्यम्

(ग) वाचि (घ) कीर्तिम्

(ii) ' सत्सङ्गतिःकिं न करोति पुंसाम्' अस्मिन् वाक्ये क्रियापदं किम् ?

(क) सत्सङ्गतिः (ख) करोति

(ग) सिञ्चति (घ) पुंसाम्

**16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5**

(अष्टमी-कक्षाया: छात्रा: परस्परं वार्तालापं कुर्वन्ति।)

सुशान्त: - भो मित्राणि! किं भवन्त: जानन्ति अद्य का तिथि: अस्ति ?

गरिमा - आम्, अहं जानामि। अद्य श्रावणमासस्य पूर्णिमा तिथि: अस्ति।

प्रशान्त: - वयं इदम् अपि जानीमःयत् प्रतिवर्षं श्रावणमासस्य पूर्णिमायां 'संस्कृत-दिवस' आयोज्यते।

(तदैव अध्यापकःकक्षां प्रविशति)

सर्वे छात्राः- (उत्थाय) हे आचार्य ! संस्कृत-दिवसे वयं भवन्तं वर्धापयामः।

आचार्य: - धन्यवादः। स्वस्ति युष्मभ्यम्। शुभःभवतु संस्कृतदिवसःयुष्मभ्यं सर्वेभ्यः।

प्रणवः आचार्य ! अद्य अस्माभिःसंस्कृतविषये एका प्रश्नोत्तरी आयोजिता अस्ति।

सुमेधा- सम्पूर्णा कक्षा द्वयोःवर्गयोःविभक्ता अस्ति। एकःकालिदासवर्गःअपरःच भासवर्गःअस्ति।

प्रणवः- एकस्य प्रश्नस्य उत्तरं कालिदासवर्गःदास्यति। अपरं प्रश्नं च भासवर्गःउत्तरिष्यति।

आचार्यः शोभनम्। अतीव सुन्दरम् आयोजनं कृतम्। अधुना प्रारम्भं कुर्वन्तु।

प्रणवः- 'संस्कृतम्' इति पदस्य कःअर्थः?

विश्वासः- 'शुद्धम्', 'परिष्कृतम्' इति संस्कृतपदस्य अर्थःअस्ति।

सुमेधा - सस्कृतभाषायाःकति रूपाणि सन्ति ?

प्रबुद्धः- संस्कृतभाषायाःद्वे रूपे स्तः। एकं वैदिकं संस्कृतम् द्वितीयं च लौकिकं संस्कृतम्।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **½x2=1**

(i) कःकक्षां प्रविशति ?

(ii) छात्राःकदा आचार्यं वर्धापयन्ति ?

(iii) कक्षायां का आयोजिता अस्ति ?

**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) संस्कृतदिवस: कदा आयोज्यते ?

(ii) विश्वासः किं उत्तरं ददाति ?

(iii) सस्कृतभाषायाःकति रूपाणि सन्ति ?

**(इ) निर्देशानुसारम् उत्तरत-** **1×2=2**

**(i) 'प्रश्नोत्तरी' इति विशेष्यपदस्य विशेषणपदं किम् ?**

(क) संस्कृते (ख) एका

(ग) अस्ति (घ) अद्य

**(ii) 'जानीमः' इति क्रियापदस्य कर्तृपदं किम् ?**

(क) वयम् (ख) अपि

(ग) इदम् (घ) यत्

**17. (अ) श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखन्तु - 1×4=4**

**पापान्निवारयति योजयते हिताय**
**गुह्यं निगूहति गुणान्प्रकटीकरोति ।**
**आपद्गतं च न जहाति ददाति काले**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥**

अन्वयः- (सन्मित्रम्) (i)____________ निवारयति हिताय योजयते, गुह्यं(ii)__________ गुणान् प्रकटीकरोति (iii)___________ न जहाति , काले च ददाति, (iv)__________ इदं सन्मित्रलक्षणं प्रवदन्ति ।।

| मञ्जूषा- निगूहति, सन्तः, पापात् , आपद्गतम् |
|---|

**अथवा**

**(आ) मञ्जूषायाः सहायतया श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत--**

**अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।**
**उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ।।**

**भावार्थः** - संसारे (i)…………. जनाः भवन्ति| एतेषु ये अधमाः जनाः सन्ति, ते सर्वदा येन केन प्रकारेण धनम् एव प्राप्तुम् इच्छन्ति। मध्यमश्रेण्याः(ii)………….धनेन सह सम्मानम् अपि इच्छन्ति। परं श्रेष्ठाःजनाःकेवलं (iii)……………………वाञ्छन्ति यतः तेषां कृते सम्मानः एव महत्त्वपूर्णःभवति, (iv)…………….कोऽपि मूल्यःन भवति ।

**मञ्जूषा -**

| सम्मानम् , त्रिविधाः, धनस्य, जनाः |
|---|

**18. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत - 1×4 = 4**

(क) संसारे <u>**सत्यस्य**</u> जयःभवति।

(ख) <u>**नद्याः**</u>जलं प्रदूषितं न करणीयम्।

(ग) <u>**महर्षिःदयानन्दः**</u>प्रचुराणि फलानि अयच्छत्।

(घ) कालिदासेन <u>**त्रीणि**</u> नाटकानि रचितानि।

**19. मञ्जूषायां प्रदत्तपदेभ्यःसमुचितपदं चित्वा अधोलिखितकथां पूरयत - ½×6 = 3**

काकःचटका च द्वे (i) ------------ आस्ताम्। एकदा तौ एकं सुन्दरं गृहम् (ii) -----------------।तत् गृहं दृष्ट्वा काकः(iii) ----------------- स्वगृहं निर्मितवान् चटका च तृणैःस्वगृहं निर्मितवती। एकदा ग्रीष्मकाले यदा (iv)---------------- गृहं नष्टम् अभवत् तदा सा काकस्य समीपम् अगच्छत्। परन्तु काकः चटकायै(v) ----------------- न अयच्छत्। तदनन्तरं वर्षाकाले काकस्य गृहं नष्टम् अभवत्। सःअपि शरणार्थं चटकायाःसमीपम् अगच्छत्। चटका काकस्य सहर्षं स्वागतम् अकरोत्। सा तस्मै भोजनम् अयच्छत्। इदं दृष्ट्वा काकः(vi) -------------- अभवत् अचिन्तयत् च – अहं तु स्वार्थी अस्मि परम् एषा उदारहृदया अस्ति।

**मञ्जूषा**

| मृत्तिकया, लज्जित; चटकाया; अपश्यताम्, शरणम्, मित्रे। |
|---|

**20. (अ) अधोलिखित-पदानां समुचितान् अर्थान् मञ्जूषातःचित्वा पदानां समक्षं लिखत -** 1×4 = 4

(i) वसुन्धरायाः

(ii) सागरम्

(iii) तटे

(iv) प्रसिद्धा

**मञ्जूषा -**

| |
|---|
| विख्याता, तीरे, समुद्रम्, भूमेः। |

**अथवा**

**(आ) अधोलिखितानां पदानां समुचितार्थकं पदं मञ्जूषातःचित्वा समक्षं लिखत-**

(i) वाचि

(ii) सन्तः

(iii) विश्वे

(iv) प्रणेता

**मञ्जूषा**

| |
|---|
| सज्जना; संसारे, रचयिता, वाण्याम्। |

============================